# Shri Jvalamukhi Stotram

# શ્રીજ્વાલામુખીસ્તોત્રમ્

## Document Information

Text title : Shri Jvalamukhi Stotram 1

File name : jvaalaamukhiistotram.itx

Category : devii, dashamahAvidyA, stotra, devI

Location : doc_devii

Author : Traditional

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar, Prakash Raj Pandey

Description-comments : rudrayaamale tantre dashavidyaarahasye

Latest update : May 1, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

Shri Jvalamukhi Stotram

# શ્રીજ્વાલામુખીસ્તોત્રમ્

શ્રીગણેશાય નમઃ । શ્રીભૈરવ ઉવાચ ।
તારં યો ભજતે માતર્બીજં તવ સુધાકરમ્ ।
પારાવારસુતા નિત્યં નિશ્ચલા તદ્ગૃહે વસેત્ ॥ ૧॥

શૂન્યં યો દહનાધિરૂઢમમલં વામાક્ષિસંસેવિતં
સેન્દું બિન્દુયુતં ભવાનિ વરદે સ્વાન્તે સ્મરેત્ સાધકઃ ।
મૂકસ્યાપિ સુરેન્દ્રસિન્ધુજલવદ્વાગ્દેવતા ભારતી
ગદ્યઃ પદ્યમયીં નિરર્ગલતરા માતર્મુખે તિષ્ઠતિ ॥ ૨॥

શુભં વહ્ન્યારૂઢં મતિયુતમનલ્પેષ્ટફલદં
સબિન્દ્વીન્દું મન્દો યદિ જપતિ બીજં તવ પ્રિયમ્ ।
તદા માતઃ સ્વઃસ્ત્રીજનવિહરણક્લેશસહિતઃ
સુખમિન્દ્રોદ્યાને સ્વપિતિ સ ભવેત્પૂજનરતઃ ॥ ૩॥

જ્વાલામુખીતિ જપતે તવ નામવર્ણાન્
યઃ સાધકો ગિરિશપત્નિ સુભક્તિપૂર્વમ્ ।
તસ્યાઙ્ઘ્રિપદ્મયુગલં સુરનાથવેશ્યાઃ
સીમન્તરત્નકિરણૈરનુરઞ્જયન્તિ ॥ ૪॥

પાશામ્બુજાભયધરે મમ સર્વશત્રૂન્
શબ્દં ત્વિતિ સ્મરતિ યસ્તવ મન્ત્રમધ્યે ।
તસ્યાદ્રિપુત્રિ ચરણૌ બહુપાંસુયુક્તૌ
પ્રક્ષાલયન્ત્યરિવધૂનયનાશ્રુપાતાત્ ॥ ૫॥

ભક્ષયદ્વયમિદં યદિ ભક્ત્યા સાધકો જપતિ ચેતસિ માતઃ ।
સ સ્મરારિરિવ ત્વત્પ્રસાદતસ્ત્વત્પદં ચ લભતે દિવાનિશમ્ ॥ ૬॥

કૂર્ચબીજમનઘં યદિ ધ્યાયેત્ સાધકસ્તવ મહેશ્વરિ યોઽન્તઃ ।
અષ્ટ હસ્તકમલેષુ સુવશ્યાસ્તસ્ય ત્ર્યમ્બકસમસ્તસિદ્ધયઃ ॥ ૭॥

ઠદ્વયં તવ મનૂત્તરસ્થિતં યો જપેત્તુ પરમપ્રભાવદમ્ ।
તસ્ય દેવિ હરિશઙ્કરાદયઃ પૂજયન્તિ ચરણૌ દિવૌકસઃ ॥ ૮॥

ૐ હ્રીં શ્રીં ત્ર્યક્ષરે દેવિ સુરાસુરનિસૂદિનિ ।
ત્રૈલોક્યાભયદે માતર્જ્વાલામુખિ નમોઽસ્તુ તે ॥ ૯॥

ઉદિતાર્કદ્યુતે લક્ષ્મિ લક્ષ્મીનાથસમર્ચિતે ।
વરામ્બુજાભયધરે જ્વાલામુખિ નમોઽસ્તુ તે ॥ ૧૦॥

સર્વસારમયિ સર્વે સર્વામરનમસ્કૃતે ।
સત્યે સતિ સદાચારે જ્વાલામુખિ નમોઽસ્તુ તે ॥ ૧૧॥

યસ્યા મૂર્ધ્નિ શશી ત્રિલોચનગતા યસ્યા રવીન્દ્વગ્નયઃ
    પાશામ્ભોજવરાભયાઃ કરતલામ્ભોજેષુ સદ્ધેતયઃ ।
ગાત્રે કુઙ્કુમસન્નિભા દ્યુતિરહિર્યસ્યાગલે ભૂષણં   var  સન્તતં
    દેવીં કોટિસહસ્રરશ્મિસદૃશીં જ્વાલામુખીં નૌમ્યહમ્ ॥ ૧૨॥

નિદ્રાં નો ભજતે વિધિર્ભગવતિ શઙ્કા શિવં નો ત્યજેદ્
    વિષ્ણુર્વ્યાકુલતામલં કમલિનીકાન્તોઽપિ ધત્તે ભયમ્ ।
દૃષ્ટ્વા દેવિ ત્વદીયકોપદહનજ્વાલાં જ્વલન્તિ તદા
    દેવઃ કુઙ્કુમપીતગણ્ડયુગલઃ સંક્રન્દનઃ ક્રન્દતિ ॥ ૧૩॥

યામારાધ્ય દિવાનિશં સુરસરિત્તીરે સ્તવૈરાત્મભૂ-
    રુદ્યદ્ભાસ્વરધર્મભાનુસદૃશીં પ્રાપ્તોઽમરજ્યેષ્ઠતામ્ ।
દારિદ્ર્યોરગદષ્ટલોકત્રિતયીસઞ્જીવનીં માતરં
    દેવીં તાં હૃદયે શશાઙ્કશકલાચૂડાવતંસાં ભજે ॥ ૧૪॥

આપીનસ્તનશ્રોણિભારનમિતાં કન્દર્પદર્પોજ્જ્વલાં
    લાવણ્યાઙ્કિતરમ્યગણ્ડયુગલાં યસ્ત્વાં સ્મરેત્ સાધકઃ ।
વશ્યાસ્તસ્ય ધરાભૃદીશ્વરસુતે ગીર્વાણવામભ્રુવઃ
    પાદામ્ભોજતલં ભજન્તિ ત્રિદશા ગન્ધર્વસિદ્ધાદયઃ ॥ ૧૫॥

હૃત્વા દેવિ શિરો વિધેર્યદકરોત્ પાત્રં કરામ્ભોરુહે
    શૂલપ્રોતમમું હરિં વ્યગમયત્ સદ્ભૂષણં સ્કન્ધયોઃ ।
કાલાન્તે ત્રિતયં મુખેન્દુકુહરે શમ્ભોઃ શિરઃ પાર્વતિ
    તન્માતર્ભુવને વિચિત્રમખિલં જાને ભવત્યા શિવે ॥ ૧૬॥

ગાયત્રી પ્રકૃતિર્ગલેઽપિ વિધૃતા સા ત્વં શિવે વેધસા

શ્રીરૂપા હરિણાપિ વક્ષસિ ધૃતાપ્યર્ધાઙ્ગભાગે તથા ।
શર્વેણાપિ ભવાનિ દેવિ સકલાઃ ખ્યાતું ન શક્તા વયં
ત્વદ્રૂપં હૃદિ માદૃશાં જડધિયાં ધ્યાતું કથૈવાસ્તિ કા ॥ ૧૭॥

જ્વાલામુખીસ્તવમિમં પઠતે સદા યઃ var યદન્તઃ
શ્રીમન્ત્રરાજસહિતં વિભવૈકહેતુમ્ ।
ઇષ્ટપ્રદાનસમયે ભુવિ કલ્પવૃક્ષં
સ્વર્ગં વ્રજેત્ સુરવધૂજનસેવિતઃ સઃ ॥ ૧૮॥

ઇતિ શ્રીરુદ્રયામલે તન્ત્રે દશવિદ્યારહસ્યે
શ્રીજ્વાલામુખીસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Ravin Bhalekar ravibhalekar@hotmail.com
Proofread by Ravin Bhalekar, Prakash Raj Pandey

*Shri Jvalamukhi Stotram*
pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*